श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीसीतारामस्तोत्रम् ॥

अयोध्यापुरनेतारं मिथिलापुरनायिकाम्।
राघवाणामलङ्कारं वैदेहानामलङ्क्रियाम्॥ १ ॥

रघूणां कुलदीपं च निमीनां कुलदीपिकाम्।
सूर्यवंशसमुद्भूतं सोमवंशसमुद्भवाम्॥ २ ॥

पुत्रं दशरथस्याद्यं पुत्रीं जनकभूपतेः।
वसिष्ठानुमताचारं शतानन्दमतानुगाम्॥ ३ ॥

कौसल्यागर्भसंभूतं वेदिगर्भोदितां स्वयम्।
पुण्डरीकविशालाक्षं स्फुरदिन्दीवरेक्षणाम्॥ ४ ॥

चन्द्रकान्ताननांभोजं चन्द्रबिम्बोपमाननाम्।
मत्तमातङ्गगमनं मत्तहंसवधूगताम्॥ ५ ॥

चन्दनार्द्रभुजामध्यं कुङ्कुमार्द्रकुचस्थलीम्।
चापालङ्कृतहस्ताब्जं पद्मालङ्कृतपाणिकाम्॥ ६ ॥

शरणागतगोप्तारं प्रणिपातप्रसादिकाम्।
कालमेघनिभं रामं कार्तस्वरसमप्रभाम्॥ ७ ॥

दिव्यसिंहासनासीनं दिव्यस्रग्वस्त्रभूषणाम्।
अनुक्षणं कटाक्षाभ्याम् अन्योन्येक्षणकाङ्क्षिणौ॥ ८ ॥

अन्योन्यसदृशाकारौ त्रैलोक्यगृहदंपती।
इमौ युवां प्रणम्याहं भजाम्यद्य कृतार्थताम्॥ ९ ॥

अनेन स्तौति यः स्तुत्यं रामं सीतां च भक्तितः।
तस्य तौ तनुतां पुण्यास्संपदः सकलार्थदाः॥ १० ॥

Scanned by CamScanner

एवं श्रीरामचन्द्रस्य जानक्याश्च विशेषतः।
कृतं हनुमता पुण्यं स्तोत्रं सद्यो विमुक्तिदम्।
यः पठेत्प्रातरुत्थाय सर्वान् कामानवाप्नुयात्॥ ११ ॥

॥ इति श्रीसीतारामस्तोत्रम् सम्पूर्णम् ॥



Scanned by CamScanner